विशेषः । रासन इति हिन्दी भाषा । तत्-
पर्य्यायः । नाकुली २ सुरसा ३ सुगन्धा ४ गन्ध-
नाकुली ५ नकुलेष्टा ६ भुजङ्गाक्षी ७ छत्राकी ८
सुवहा ९ । इत्यमरः ॥ नाकुल्यादिपञ्चकं
रास्नायाम् । नकुलेष्टादिचतुष्कं सर्पाक्ष्यामि-
त्याहुः । इति तट्टीकायां भरतः ॥ रस्या १०
श्रेयसी ११ रसना १२ रसा १३ सुगन्धिमूला १४
रसाढ्या १५ अतिरसा १६ द्रोणगन्धिका १७
सर्पगन्धा १८ पलङ्कषा १९ । इति जटाधरः ॥
अस्या गुणाः । गुरुत्वम् । तिक्तत्वम् । उष्ण-
त्वम् । विषवातास्रकासशोथकम्पोदरश्लेष्मनाशि-
त्वम् । पाचनत्वञ्च ।
"रास्ना तु त्रिविधा प्रोक्ता मूलं पत्रं तृण-
न्तथा ।
श्रेयौ मूलदलौ श्रेष्ठौ तृणा रास्ना तु मध्यमा ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी ॥
नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् ।
भोगिलूतावृश्चिकाखुविषज्वरक्रिमिव्रणान् ॥"
इति भावप्रकाशः ॥
रास्ना शोथामवातघ्नी । इति राजवल्लभः ॥
ओषधिविशेषः । काँटा आमरुली इति भाषा ।
तत्पर्य्यायः । एलापर्णी २ सुवहा ३ युक्त-
रसा ४ । इत्यमरः ॥ अपि च ।
"रास्ना युक्तरसा रस्या सुवहा रसना रसा ।
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ॥
रास्नाममपाचनी तिक्ता गुरूष्णा कफवातजित् ।
शोथश्वाससमीरास्रवातशूलोदरापहा ।
कासज्वरविषाशीतिवातिकामयहिध्महृत् ॥"
इति भावप्रकाशः ॥
(रशना । यथा, वाजसनेयसंहितायाम् ।१।३०।
"आदित्यै रास्नासि ।"
"हे योक्त्र आदित्यै अदित्या भूम्यास्त्वं रास्नासि
रशना असि ।" इति तद्भाष्ये महीधरः ।
चन्द्रपत्नीनामन्यतमा । यथा, ब्रह्मवैवर्त्ते ।१।
९।१३—१४ ।
"नामानि चन्द्रपत्नीनां सावधानं निबोध मे ।
कला कलावती कान्ता कालिका कलहप्रिया ॥
कन्दली भीषणा रास्ना प्रमोदा भूषणा शुकी ।
एतासां बहवः पुत्रा बभूवुः शिवपार्षदाः ॥")
राहुः, पुं, (रह त्यागे + बहुलवचनात् उण् ।)
त्यागः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (रहति
गृहीत्वा त्यजति चन्द्रमिति । रह त्यागे +
बहुलवचनात् उण् । इत्युज्ज्वलः ।१।१।)
ग्रहविशेषः । तत्पर्य्यायः । तमः २ स्वर्भानुः ३
सैंहिकेयः ४ विधुन्तुदः ५ । इत्यमरः ॥ अस्र-
पिशाचः ६ ग्रहकल्लोलः ७ सैंहिकः ८ उप-
प्लवः ९ शीर्षकः १० उपरागः ११ सिंहिका-
सुतः १२ । इति शब्दरत्नावली ॥ तमःपर्व्वा १३
कबन्धः १४ । इति जटाधरः ॥ अगुः १५
असुरः १६ । इति ज्योतिस्तत्त्वम् ॥ तस्योत्-
पत्त्यादिर्यथा,—
"सिंहिकायामथोत्पन्ना विप्रचित्तिसुतास्तथा ।
शम्भः शम्बलगात्रश्च यज्ञः शाल्वस्तथैव च ॥
इल्वलो नमुचिश्चैव वातापी हस्तपो जिकः ।
हरकल्पकलिनाभौ भौमश्च नरकस्तथा ॥
राहुर्ज्येष्ठस्तु तेषां वै चन्द्रसूर्य्यप्रमर्द्दनः ।
इत्येते सिंहिकापुत्रा देवैरपि दुरासदाः ॥
दारुणाभिजनाः क्रूराः सर्व्वे ब्रह्मद्विषस्तु ते ।
दशान्यानि सहस्राणि सैंहिकेयो गणः स्मृतः ॥
निहतो जामदग्न्येन भार्गवेण बलीयसा ।
स्वर्भानोस्तु प्रभा कन्या पुलोम्नस्तु शची सुता ॥"
इति वह्निपुराणे प्रजापतिसर्गनामाध्यायः ॥ * ॥
तस्य शिरश्छेदकारणं यथा,—
"देवलिङ्गप्रतिच्छन्नः स्वर्भानुर्देवसंसदि ।
प्रविष्टः सोममपिबत् चन्द्रार्काभ्याञ्च सूचितः ॥
चक्रेण क्षुरधारेण जहार पिबतः शिरः ।
हरिस्तस्य कबन्धस्तु सुधयाप्लावितोऽपतत् ॥
शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् ।
यस्तु पर्व्वणि चन्द्रार्कावभिधावति वैरधीः ॥"
इति श्रीभागवते ८ स्कन्धे ९ अध्यायः ॥
स च मलयपर्व्वतजातः । शूद्रवर्णः । द्वादशा-
ङ्गुलपरिमाणः । कृष्णवर्णः । कृष्णवस्त्रः । सिंह-
वाहनः । चतुर्भुजः । खड्गवरशूलचर्म्मधारी ।
सूर्य्यास्यः । अस्य अधिदेवता कालः । प्रत्यधि-
देवता सर्पः । इति ग्रहयज्ञतत्त्वम् ॥ अस्य
स्वरूपं शनिवत् । स च चण्डालजातिः ।
सर्पाकृतिः । अस्थिस्वामी नैरृतदिक्स्वामी
च । इति बृहज्जातकादयः ॥ (राहुचारस्य
फलाफलं बृहत्संहितायाः ५ अध्यायतो द्रष्ट-
व्यम् ॥)
राहुग्राहः, पुं, (राहोर्ग्राहो ग्रहणं यत्र ।)
चन्द्रसूर्य्ययोर्ग्रहणम् । यथा,—
"राहुग्राहोऽर्केन्द्वोर्ग्रह उपराग उपप्लवः ॥"
इति हेमचन्द्रः । २ । ३९ ॥
(अत्र राहुग्रास [illegible] पाठो दृश्यते ॥)
राहुचक्रं, क्ली, (राहोश्चक्रम् ।) रव्यादिसप्त-
वारेषु अष्टगत्या यामार्द्धेन यामार्द्धं प्राप्य
वामदिक्षु राहोर्गमनम् । यथा,—
"पश्चादर्के विधौ वह्नौ सौम्यां शे वायवे कुजे ।
रक्षोदिशि भृगौ याम्यां गुरावीशे शनौ दिने ।
राहुर्भ्रमति यामार्द्धादष्टगत्या च वामतः ॥
द्यूते युद्धे विवादे च यात्रायां सम्मुखं स्थितम् ।
राहुं विवर्ज्जयेद्यत्नाद्यदीच्छेत् कर्म्मणः फलम् ॥"
इति ज्योतिस्तत्त्वमुक्तावली ॥ * ॥
राहुकालानलचक्रं यथा,—
"तस्य चक्रं प्रवक्ष्यामि राहुकालानलाख्यकम् ।
शलाकासप्तकं चक्रं ईशाद्यौ त्रिकादिकाः ॥
यत्र ऋक्षे स्थितो राहुर्वदनं तद्विनिर्द्दिशेत् ॥
मुखात् पञ्चदशे ऋक्षे तस्य पुच्छं व्यवस्थितम् ।
अष्टोत्तरशतं ख्याता आयभे यत्र केतवः ॥
चाप्य तच्चुम्बनात् सर्वं सहस्रार्केसमन्वितः ।
राहुभुक्तानि ऋक्षाणि जीवपक्षे जयोदश ॥
जयोदशैव भोग्यानि मृतपक्षे प्रकीर्त्तयेत् ।
मृतपक्षे मुखं तस्य गुदं जीवाङ्गमध्यगम् ॥
एवमङ्गद्वयो राहुर्ज्ञातव्यः स्वरपारगैः ।
जीवपक्षे चपागाणे मृतपक्षे रवौ स्थिते ।
तस्मिन् काले शुभा यात्रा विपरीते तु
हानिदा ॥"
इति स्वरोदयः ॥
राहुच्छत्रं, क्ली, आर्द्रकम् । इति राजनिर्घण्टः ॥
राहुदर्शनं, क्ली, (राहोर्दर्शनं यत्र ।) राहो-
श्चाक्षुषज्ञानम् । ग्रहणमिति यावत् । यथा,—
"चक्षुषा दर्शनं राहोर्यत्तद्ग्रहणमुच्यते ।
तत्र कर्म्माणि कुर्व्वीत गणनामात्रतो न तु ॥
राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु ।
स्नानमाचम्य कर्त्तव्यं दानश्राद्धविवर्ज्जितम् ॥"
इति तिथ्यादितत्त्वम् ॥
राहुभेदी, [न्] पुं, (राहुं भिनत्तीति । भिद् +
णिनिः ।) विष्णुः । इति जटाधरः ॥
राहुमूर्द्धभित्, पुं, (राहोर्मूर्द्धानं भिनत्ति छिन-
त्तीति । भिद् + क्विप् ।) विष्णुः । इति त्रिकाण्ड-
शेषः ॥
राहुरत्नं, क्ली, (राहुप्रियं रत्नम् । राहो रत्न-
मिति वा ।) गोमेदकः । इति राजनिर्घण्टः ॥
राहुलसूः, पुं, बुद्धः । इति हेमचन्द्रः । २ ।
१५१ ॥
राहुबृहस्पतियोगः, पुं, (राहुणा बृहस्पतेर्योगो
मेलनम् ।) एकराशिस्थितगुरुराहुः । गुरु-
चाण्डालियोग इति ख्यातः । तस्य काला-
शुद्धिजनकत्वं यथा, भोजदेवव्यवहारसमुच्चये ।
"सर्व्वं कार्य्यं न कर्त्तव्यं गुरौ सिंहेऽस्तगेऽपि च ।
व्रतदीक्षे न कुर्व्वीत तमोयुक्ते बृहस्पतौ ॥"
तमोयुक्ते राहुयुक्ते । व्रतदीक्षे इति निखिलर-
वैदिककर्म्मोपलक्षणम् । तथा च स्मृतिसारे
ज्योतिषम् ।
"एकराशौ स्थितौ स्यातां यदि राहुबृहस्पती ।
विवाहव्रतयज्ञादि सर्व्वं तत्र परित्यजेत् ॥"
मलमासादुपक्रम्य भविष्ये ।
"ऋक्षभेदेऽप्येकराशौ सम्पर्कौ यदि तानयोः ।
गुरो राहोरपि तथा त्यजेद्विद्वान् संशयः ॥"
अत्र गुरोर्लङ्घितत्वं हेतुः ।
"यत्र यत्र स्थितो जीवस्तमोयोगेन लङ्घ्यते ।
उपहासाय किं न स्यादस्तसङ्गी मनीषिणाम् ॥"
इति मलमासतत्त्वम् ॥ * ॥
अस्य प्रतिप्रसवो यथा,—
"कर्णाटलाटाङ्गकलिङ्गदेशे
बृहस्पती राहुयुतो विरुद्धः ।
शेषेषु देशेषु न चास्ति दोषः
सर्व्वत्र कार्य्यं मुनयो वदन्ति ॥"
इति बृहद्दाक्षमार्त्तण्डधृतवचनमिति केचिद्-
वदन्ति ॥
राहुस्पर्शः, पुं, (राहोः स्पर्शो यत्र ।) उपरागः ।
इति हलायुधः ॥